# प्रबन्धसंक्षेपः

सिद्धान्तकौमुदीप्रक्रियासर्वस्वयोः आधारेण समासस्य तुलनात्मकं पठनं शोधग्रन्थस्यास्य सप्तसु अध्यायेषु कृतं वर्तते। सप्ताध्यायपर्यन्तानामध्यायानां शीर्षकाणि यथा-

१. उपोद्घातः।

(क) भारतीयाः केरलीयाश्च व्याकरणग्रन्थाः।

(ख) प्रक्रियाप्रस्थानमाहात्म्यम्।

(ग) समासः- सामान्यसमीक्षा।

२. अव्ययीभावसमासः- विवरणात्मकं पठनम्।

३. तत्पुरुषसमासः- विवरणात्मकं पठनम्।

४. बहुव्रीहिसमासः- विवरणात्मकं पठनम्।

५. द्वन्द्वसमासः- विवरणात्मकं पठनम्।

६. विवेचनात्मकं पठनम्।

७. निर्णयसंक्षेपः।

तत्र साकल्येन प्रपञ्चितस्य विषयस्य दिङ्मात्रेण कथनं प्रकरणेऽस्मिन् क्रियते। तत्तु कौमुदीकारस्य प्रक्रियासर्वस्वकारस्य च मिथः तुलनायां विवरणे वैशिष्ट्यप्रतिपादनायैव। विवरणे यत्र अत्यल्पः भेदः तस्य इह सूचनाय यत्नो न क्रियते। आशयाविष्कारे उभयोः ग्रन्थकारयोः व्याख्यानशैल्यां यत्र स्पष्टतया वि वरणकौशलं वर्तते तस्य परं विन्यासः आवर्तनवारणाय इह पर्याप्तं भवतीति तत्र हेतुः।

'सह सुपा'[1] इति सूत्रस्य योगविभागेन साकं कौमुद्यां परं व्याख्यातं दृश्यते, न सर्वस्वे। प्रकरणवशात् समासस्य चतुर्विधत्वं सर्वस्वे प्रतिपाद्यते। 'सुपो धातुप्र

---

1 अ.सू. - २.१.४ सि.कौ.सू. - ६४९ प्र.स.सू. - २०६३

ातिपदिकयोः'[2] इति सूत्रार्थकथनवेलायां 'इवेन सह समासो विभक्त्यलोपश्च'[3] इति वार्त्तिकेन विभक्तेः यत्र लोपो न भवति, तस्मिन् विषयेऽपि सूचनां ददाति कौमुदीकारः। सर्वस्वकारस्तु शास्त्रविषयस्यास्य विचारं प्रकृते न करोति।

'नाव्ययीभावादतोऽम्त्वपञ्चम्याः'[4] इति सूत्रव्याख्यानं कवितया करोति सर्वस्वकारः यथा- 'अदन्तादव्ययीभावात् सुपो लुङ् नास्ति किं पुनः।
पञ्चमीवर्जितानां तु सुपामम्भाव इष्यते।।' इति।

सहृदयत्वं शास्त्रपाण्डित्यञ्च अस्यां कारिकायां स्पष्टतया भासते। 'यथाऽसादृश्ये'[5] इति सूत्रविषये मतान्तरमादाय 'यथापुरम्' इति उदाहरणप्रदर्शनेन साकं सादृश्यार्थकस्यापि यथाशब्दस्य समासो विधीयते सर्वस्वे इति वैशिष्ट्यमत्र। 'यावदवधारणे'[6] इति सूत्रविषये अर्थस्य गम्यमानत्वमादाय विवरणं कर्तुं न प्रयत्नं करोति कौमुदीकारः। सर्वस्वकारस्तु कण्ठतः अर्थविवरणं करोति।

'सुप्प्रतिना मात्रार्थे'[7] इति सूत्रविषयेऽपि गतार्थत्वं स्वीकरोति कौमुदीकारः। सर्वस्वकारस्तु सूत्रं विवृणोति। 'अक्षशलाकासंख्याः परिणा'[8] इति सूत्रविषये कौमुदीसर्वस्वकारयोर्मध्ये मतभेदो वर्तते। 'द्यूतव्यवहारे पराजय एवायं समासः' इति कौमुदीकारः। जयविपर्ययविषये इति सर्वस्वकारः। 'विभाषा'[9] इति सूत्रे

---

2 अ.सू. - २.४.७१ सि.कौ.सू. - ६५० प्र.स.सू. - २७८

3 वा. - १२३६, १३४१

4 अ.सू. - २.४.८३ सि.कौ.सू. - ६५७ प्र.स.सू. - २०६९

5 अ.सू. - २.१.७ सि.कौ.सू. - ६६१ प्र.स.सू. - २०७४

6 अ.सू. - २.१.८ सि.कौ.सू. - ६६२ प्र.स.सू. - २०७५

7 अ.सू. - २.१.९ सि.कौ.सू. - ६६३ प्र.स.सू. - २०७६

8 अ.सू. - २.१.१० सि.कौ.सू. - ६६४ प्र.स.सू. - २०७७

9 अ.सू. - २.१.११ सि.कौ.सू. - ६६५ प्र.स.सू. - २०७८

वषये शास्त्रवैपुल्यं स्पष्टयति कौमुदीकारः। सर्वस्वे अल्पमात्रकथनम् इति परिमितिः।

'अपपरिबहिरञ्चवः पञ्चम्याः'[10] इति सूत्रविषये तावत् सर्वस्वकारः वाचालो भवति। विस्तृतार्थकथनेन साकं विपरीतदृष्टान्तानामपि समावेशः अत्र। 'तिष्ठद्गुप्रभृतीनि च'[11] इति सूत्रविषये भोजमतस्य शङ्करमतस्य च समावेशेन साकं दृष्टान्तप्रदर्शनं वर्तते सर्वस्वे। 'पारे मध्ये षष्ठ्या वा'[12] इति सूत्रविषयेऽपि भोजमतमप्यादाय सूत्रप्रवृत्तिं विपुलीकरोति सर्वस्वकारः।

'संख्या वंश्येन'[13] इति सूत्रं अव्ययीभावप्रकरणे कौमुद्यां यद्यपि कथितं वर्तते, तथापि हरदत्तमतमादाय बहुव्रीहिविषयेऽपि अस्य प्रवृत्तिं स्थापयति सर्वस्वकारः। 'संख्यापूर्वो द्विगुश्च'[14] इति पठित्वा उभयसंज्ञासिद्धौ 'द्विगुश्च'[15] इति सूत्रं वारयितुं शक्यते इति मतान्तराशयस्य निरासः कौमुद्याम्। पञ्चराजमिति दृष्टान्ताय सूत्रस्यास्य सप्रयोजनत्वमिह निश्चितं वर्तते। विषयस्यास्य प्रतिपादनं सर्वस्वे नास्ति। 'स्वयं क्तेन'[16] इति सूत्रविषये सूत्रक्रमस्य भेदो वर्तते सर्वस्वे। 'खट्वा क्षेपे'[17] इति सूत्रस्तु निन्दायां प्रवर्तते इत्युक्तं कौमुद्याम्। ि

10 अ.सू. - २.१.१२ सि.कौ.सू. - ६६६ प्र.स.सू. - २०७९

11 अ.सू. - २.१.१७ सि.कौ.सू. - ६७१ प्र.स.सू. - २०८४

12 अ.सू. - २.१.१८ सि.कौ.सू. - ६७२ प्र.स.सू. - २०८६

13 अ.सू. - २.१.१९ सि.कौ.सू. - ६७३ प्र.स.सू. - २०८७

14 अ.सू. - २-१-५२

१५ अ.सू. - २.१.२३ सि.कौ.सू. - ६८५ प्र.स.सू. - २२०२

१५

16 अ.सू. - २.१.२५ सि.कौ.सू. - ६८७ प्र.स.सू. - २१०२

१७

अ.सू. - २.१.२६ सि.कौ.सू. - ६८८ प्र.स.सू. - २१०३

वपरीतोदाहरणस्य प्रदर्शनमपि वर्तते सर्वस्वे यथा 'खट्वामारूढो विद्वान्' इति। निन्दायाः अभावात् अत्र समासो न इत्यवगन्तव्यम्।

'कालाः'[18] इति सूत्रविषयस्तु अनत्यन्तसंयोगार्थमिति स्पष्टयति भट्टोजिः। विषयेऽस्मिन् मौनं भजते भट्टपादः। 'तृतीया तत्कृतार्थेन गुण वचनेन'[19] इति सूत्रस्योदाहरणं शङ्कुलाखण्डः इति। सर्वस्वकारस्तु सूत्रस्यास्य उदाहरणत्वेन कुङ्कुमशोणः इत्युक्तम्। कुङ्कुमशोण इत्युदाहरणे तत्कृतार्थगुण वचनत्वं प्रत्यक्षसिद्धम्। 'कर्तृकरणे कृता बहुलम्'[20] इति सूत्रव्याख्यानवेलायां दलप्रयोजनं चिन्तयति कौमुदीकारः। तथा न करोति सर्वस्वकारः। 'अन्नेन व्यञ्जनम्'[21] इति सूत्रस्योदाहरणे कौमुदीकारः प्रागल्भ्यं प्रदर्शयति। न तथा भट्टपादः।

'भक्ष्येण मिश्रीकरणम्'[22] इति सूत्रविषये उदाहरणप्रदर्शने कौमुदीकारस्य भट्टपादापेक्षया इह सामर्थ्यं प्रतिपादितं वर्तते। किन्तु भोजमतमादाय दृष्टान्तान्तराणामपि प्रदर्शनं सर्वस्वे वर्तत इत्यपि अत्र उक्तं वर्तते। 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः'[23] इति सूत्रस्य ज्ञापकत्वं बलिरक्षितग्रहणेन समर्थितं यत् कौमुदीकारेणोक्तं वर्तते, तस्य विवरणमत्र भवति। ज्ञापकविषये भट्टपादः मौनमवलम्बते।

---

18 अ.सू. - २.१.८ सि.कौ.सू. - ६९० प्र.स.सू. - २१०५

19 अ.सू. - २.१.३० सि.कौ.सू. - ६९२ प्र.स.सू. - २१०७

20 अ.सू. - २.१.३२ सि.कौ.सू. - ६९४ प्र.स.सू. - २१०९

21 अ.सू. - २.१.३४ सि.कौ.सू. - ६९६ प्र.स.सू. - २१११

22 अ.सू. - २.१.३५ सि.कौ.सू. - ६९७ प्र.स.सू. - २११२

23 अ.सू. - २.१.३६ सि.कौ.सू. - ६९८ प्र.स.सू. - २११३

'पञ्चमी भयेन'[24] इति सूत्रेण विहितः समासः न  केवलं भयशब्दस्य किन्तु भयार्थकस्यापि इति कौमुदीकारमतं प्रति अत्र सूचना भवति। अत्र अर्थाविषयेऽपि प्रकृतसमासो भवतीति वक्तुं सर्वस्वकारः न यत्नं करोति। तथापि कार्यान्तरप्रतिपादने सः उत्सुको भवति। कृता बहुलमित्यधिकारात् रिपुभीतः, रिपुभीरुः, ग्रामनिर्गतः, अधर्मजुगुप्सुः इत्यादीनामुदाहरणानां समावेशो दृश्यते सर्वस्वे। वैशिष्ट्यस्यास्य प्रस्तावः इह स्पष्टतया प्रतिपादितं वर्तते। 'स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन'[25] इति सूत्रस्य अर्थप्रतिपादनं भट्टपादेन कण्ठतः कृतं वर्तते इति वैशिष्ट्यं प्रति अत्र प्रस्तावः।

'याजकादिभिश्च'[26] इति सूत्रविषये सरस्वतीकण्ठाभरणस्थां कारिकामादाय गणपठितानां शब्दानामपि उदाहरणत्वेन सन्निवेशः कृतो वर्तते सर्वस्वे इति शास्त्रकार्यं अत्र विचिन्तितं वर्तते। 'पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन'[27] इति सूत्रविषये सरस्वतीकण्ठाभरणमाश्रित्य या महती चर्चा इह कृता वर्तते, तस्याः विवरणमिह लिखितं वर्तते। 'तृजकाभ्यां कर्तरि'[28] इति सूत्रविषये भट्टपादापेक्षया भट्टोजिदीक्षितेन यानि शास्त्रकार्याणि अधिकतया विस्तारितानि वर्तन्ते तानि अस्मिन् शोधग्रन्थेऽप्युक्तानि।

'नित्यं क्रीडाजीविकयोः'[29] इति सूत्रविषये राममतमादाय भट्टोजिदीक्षितमतापेक्षया येषामुदाहरणानां समावेशो वर्तते, तेषामपि प्रस्तावः इह अस्ति। 'पूर्वपराधरोत्तरमेकदेशिनैकाधिकरणे'[30] इति सूत्रविषयेपि भट्टोजि

---

24 अ.सू. - २.१.३७ सि.कौ.सू. - ६९९ प्र.स.सू. - २११४

25 अ.सू. - २.१.३९ सि.कौ.सू. - ७०१ प्र.स.सू. - २११६

26 अ.सू. - २.२.९ सि.कौ.सू. - ७०३ प्र.स.सू. - २११९

27 अ.सू. - २.२.११ सि.कौ.सू. - ७०१ प्र.स.सू. - २११६

28 अ.सू. - २.२.१५ सि.कौ.सू. - ७०९ प्र.स.सू. - २१२५

29 अ.सू. - २.२.१७ सि.कौ.सू. - ७११ प्र.स.सू. - २१२७

30 अ.सू. - २.२.१ सि.कौ.सू. - ७१२ प्र.स.सू. - २१२८

पादेन यत् ज्ञापकेन साधितं तत् भोजमतमादाय स्वीकरोति भट्टपादः। वि
षयस्यास्य प्रस्तावः अस्मिन् शोधग्रन्थे वर्तते। 'अर्धं नपुंसक'[31]मिति सूत्रविषये भट्टपादस्य भट्टोजिदीक्षितस्य च सहमतत्वं वर्तते तथापि भट्टपादः भोजमतस्यापि स्वीकारं कृत्वा प्रकृतसूत्रेण विहितस्य समासस्य पाक्षिकत्वं प्र
दर्शयति। आशयस्यास्य विन्यासः इह प्रदर्शितं वर्तते।

'द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम्'[32] इति सूत्रविषयेऽपि भोजमतं स्
वीकृत्य यदुदाहरणप्रपञ्चनं भट्टपादेन कृतं वर्तते, तस्यापि उल्लेखः अस्मिन् शोधग्रन्थे वर्तते। 'प्राप्तापन्ने च द्वितीयया'[33] इति सूत्रविषये सूत्रदलानां पदच्छेदं कृत्वा यानि कार्याणि साधितानि, तस्मिन् विषये भट्टपाददीक्षितयोः वस्तुतया मतभेदो नास्तीत्येतत्तथ्यमपि इह विवृतं वर्तते। 'सप्तमी शौण्डैः'[34] इति सूत्रवि
षये कौमुदीकारापेक्षया शौण्डादि गणपठितानां पदानां समावेशः वृत्तौ निवेशनं कृत्वा सूत्रार्थविवरणं अनायासं करोति भट्टपादः। कार्यस्यास्य प्रस्तावः इह उल्लिखितं वर्तते। 'संज्ञाया'मिति[35] सूत्रविषये नित्यसमासोऽयमिति सूचितं भट्टोजिना, न तु भट्टपादेन। मतभेदश्चास्य दृष्टान्तप्रदर्शनपूर्वकमिह विन्यस्तो वर्तते। 'क्तेनाहोरात्रावयवाः'[36] इति सूत्रकार्ये यत् दलप्रयोजनमधिकृत्य कौमुद्यां यो विचारो वर्तते तादृशः विचारः भट्टपादेन न क्रियते इति तथ्यमिह सूचितं वर्तते। 'क्षेपे'[37] इति सूत्रविषये प्रक्रियासर्वस्वे भट्टोजिदीक्षितापेक्षया बह

31 अ.सू. - २.२.२ सि.कौ.सू. - ७१३ प्र.स.सू. - २१२९

32 अ.सू. - २.२.३ सि.कौ.सू. - ७१४ प्र.स.सू. - २१३०

33 अ.सू. - २.२.४ सि.कौ.सू. - ७१५ प्र.स.सू. - २१०१

34 अ.सू. - २.१.४० सि.कौ.सू. - ७१७ प्र.स.सू. - २१३१

35 अ.सू. - २.१.४४ सि.कौ.सू. - ७२१ प्र.स.सू. - २१३५

36 अ.सू. - २.१.४५ सि.कौ.सू. - ७२२ प्र.स.सू. - २१३६

37 अ.सू. - २.१.४७ सि.कौ.सू. - ७२४ प्र.स.सू. - २१३८

वो विषयाः उक्ताः। कौमुद्यां यदुदाहरणं प्रदत्तं वर्तते, यथा अवतप्ते नकुलस्थितमिति, तत्र निन्दा न सुव्यक्ता इत्याक्षेपः। भट्टपादस्तु अस्मिन् विषये कौमुदीकारापेक्षया अत्यन्तं युक्तान्युदाहरणानि दत्तवान्। विषयस्यास्याविष्कारः इह सुव्यक्तं प्रदर्शितं वर्तते। 'पात्रे समितादयश्च'[38] इति सूत्रे भोजमतानुसारेण, माधवमतानुसारेण च बहूनां दृष्टान्तानां यः समावेशः अस्ति तेषामिह विस्तरेण विन्यासो वर्तते। 'पूर्वकालैकसर्वजरत्पुराण नवकेवलाः समानाधिकरणे'[39] इति सूत्रे बहूनामुदाहरणानां समावेशः कौमुद्यां, प्रक्रियासर्वस्वे तथा न । सूत्रार्थावबोधनाय अत्रत्यानि उदाहरणानि बहु उपकुर्वन्ति। 'तद्धितार्थोत्तरपदसमाहारे च'[40] इति सूत्रस्योदाहरणं पौर्वशाला इति कौमुद्याम्। उदाहरणस्यास्य प्रकारान्तरेण साधुत्वं समर्थयति सर्वस्वकारः। सा रीतिः इह उल्लिखिता वर्तते। 'पापाणके कुत्सितैः'[41] इति सूत्रविषयेऽपि यत् बहूनां दृष्टान्तानां भोजमतानुसारेण समाहृत्य व्याख्यानं क्रियते। तस्य समीचीनत्वं अपि इह निर्धारितं वर्तते।

'श्रेण्यादयः कृतादिभिः'[42] इति सूत्रे यद्यपि 'श्रेण्यादिषु च्व्यर्थवचनं कर्तव्यम्' इति कौमुदीकारः, 'च्व्यर्थोऽत्र इष्टः' इति प्रक्रियासर्वस्वकारः च। वार्तिकद्वयमङ्गीकरोति तथापि सूत्रार्थकथने भेदो नास्तीति तत्वमपीह सूचितम्। 'वर्णो वर्णेन'[43] इति सूत्रविषये भोजमतमादाय जातिस्वरूपः शब्दः जातिस्

38 अ.सू. - २.१.४८ सि.कौ.सू. - ७२५ प्र.स.सू. - २१३९

39 अ.सू. - २.१.४९ सि.कौ.सू. - ७२६ प्र.स.सू. - २१४०

40 अ.सू. - २.१.५१ सि.कौ.सू. - ७२८ प्र.स.सू. - २१४३

41 अ.सू. - २.१.५४ सि.कौ.सू. - ७३३ प्र.स.सू. - २१४८

42 अ.सू. - २.१.५९ सि.कौ.सू. - ७३८ प्र.स.सू. - २१५३

43 अ.सू. - २.१.६३ सि.कौ.सू. - ७५० प्र.स.सू. - २१६३

वरूपेण शब्देन समस्यते इत्यर्थमादाय तदनुकूलस्य 'नरसिंह' इति दृष्टान्तस्यापि सूत्रविषये अन्तर्भावं करोति भट्टपादः। कौमुद्यां तु एतादृशविस्तृतकथनं नास्तीत्येतत् इह व्यक्ततया वर्तते।

'कुमारः श्रमणादिभिः'[44] इति सूत्रविषये श्रमणादिगणपठितानां शब्दानां मध्ये आद्यपठितानां सप्तपदानां स्त्रीलिङ्गेऽन्तर्भावात् स्त्रीत्वे प्राप्ते पुंवद्भावो भवतु इत्येतदर्थं पुंवत्वस्य कण्ठतः उच्चारणं भट्टपादः करोति। वैशिष्ट्यस्यास्य प्रस्तावः इह उल्लिखितं वर्तते।

'भूषणेऽलम्'[45] इति सूत्रविषये यत् दलप्रयोजनं कौमुदीकारेणोक्तं वर्तते, तन्न करोति सर्वस्वकारः। अतः विपरीतदृष्टान्तकथनं सर्वस्वे नावश्यकं सञ्जातम्। तस्याप्युल्लेखः इह क्रियते। 'जीविकोपनिषदावौपम्ये'[46] इति सूत्रे वार्त्तिकानां विषये कारिकामाश्रित्य यत् अर्थकथनं सर्वस्वे वर्तते, तस्यापि प्रतिपादनमिह विशिष्य कृतं वर्तते। 'क्त्वा च'[47] इति सूत्रस्य उदाहरणप्रदर्शनाय कृष्णकथासूचकभोजकारिकाम् स्वीकरोति भट्टपादः। अस्य सूत्रस्योल्लेखः सर्वस्वे अब्विधौ दृश्यते।

'अह्नष्ठखोरेव'[48] इति सूत्रविषये प्रसङ्गवशात् 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहण'मिति परिभाषा उल्लिखितं वर्तते। सर्वस्वकारस्तु प्रकरणानुरोधेन परिभाषामत्र न योजयति। 'स्वाङ्गाच्चेतः'[49] इति सूत्रविषये स्वाङ्गाच्चेतः अमानिनीति वक्तव्यमिति सूत्रस्य वार्त्तिकस्य च समन्वयेन अर्थप्र

44 अ.सू. - २.१.७० सि.कौ.सू. - ७५२ प्र.स.सू. - २१६४

45 अ.सू. - १.४.६४ सि.कौ.सू. - ७६५ प्र.स.सू. - २१७८

46 अ.सू. - १.४.७९ सि.कौ.सू. - ७८० प्र.स.सू. - २१९५

47 अ.सू. - २.२.२२ सि.कौ.सू. - ७८५ प्र.स.सू. - ९२८

48 अ.सू. - ६.४.१४ सि.कौ.सू. - ७८६ प्र.स.सू. - ११४८

49 अ.सू. - ६.३.४० सि.कौ.सू. - ८४१ प्र.स.सू. - २२४३

ातिपादनं वर्तते कौमुद्याम्। सर्वस्वकारेण कौमुद्यां वार्त्तिकत्वेन स्वीकृतस्यापि सूत्रांशत्वमादाय 'स्वाङ्गाच्चेतोऽमानिनि' इति सूत्रस्वरूपं प्रदर्श्यते। 'क्षुद्रजन्तवः'[50] इति सूत्रविषये 'नकुलपर्यन्ताः क्षुद्रजन्तवः' इति भाष्यकारमतमाश्रित्य सूत्रार्थविन्यासं भट्टपादः करोति। अत्र यूकापिपीलिकम्, मण्डूकमूषिकम् इति भिन्नदृष्टान्तप्रदर्शनञ्च सर्वस्वे वर्तते, तस्यापि प्रतिपादनमिह विशिष्य कृतं वर्तते।

'आनङृतो द्वन्द्वे'[51] इति सूत्रविषये मण्डूकप्लुत्या अनुवर्तनं करोति भट्टोजिदीक्षितः। सा रीतिः सर्वस्वकारेण अनुवर्तिता न वर्तते। 'द्वन्द्वाच्चुदषहान्तात्समाहारे'[52] इति सूत्रविषये कौमुदीस्थानां वाक्त्वचं, त्वक्स्रजं, शमीदृषदमित्युदाहरणानां स्थाने वाग्रुचं, रोगभिषजं, दण्डदृषदमिति भिन्नानामुदाहरणानां समावेशो दृश्यते सर्वस्वे। वैशिष्ट्यस्यास्य प्रस्तावः इह स्पष्टतया प्रतिपादितं वर्तते।

एवं तुलनात्मकपठनस्यास्य स्वरूपकथनं एकविंशत्यात्मके शीर्षके अन्तर्भावयितुं शक्यते यथा-

1. पदच्छेदविषये मतभेदः।
2. अर्थविन्यासे वैरुद्ध्यम्।
3. उदाहरणप्रदर्शने भेदः।
4. अन्यसूरीणां मतानां विनिवेशः।
5. सूत्राणां वैयर्थ्यसार्थक्यकथनम्।
6. सूत्राणां विस्तृतार्थकथनम्।

50 अ.सू. - २.४.७ सि.कौ.सू. - ९११ प्र.स.सू. - २३१३

51 अ.सू. - ६.३.२५ सि.कौ.सू. - ९२१ प्र.स.सू. - २३३५

52 अ.सू. - ५.४.१०६ सि.कौ.सू. - ९३० प्र.स.सू. - २३०७

7. सूत्राणां अल्पाक्षरेण अर्थकथनम्।
8. गणपाठानां सूत्रार्थे निवेशनम्।
9. प्रत्युदाहरणप्रदर्शनम्।
10. वृत्तौ वार्त्तिकानां निवेशनम्।
11. कवितासरणिमाश्रित्य वृत्तिविन्यासः।
12. सूत्रविषये ज्ञापकत्वप्रतिपादनम्।
13. सूत्रोक्तदलस्य अर्थविशेषमादाय वार्त्तिकं विना उदाहरण-सिद्धिः
14. अपाणिनीयानां स्वीकारः।
15. एकस्य विषयान्तरप्रतिपादनं, अन्यस्य तस्मिन् विषये मौनत्वम्।
16. सूत्राणां भिन्नप्रकरणनिवेशत्वम्।
17. दलप्रयोजनविचारः।
18. विभक्तिप्रतिरूपकनिपातकथनम्।
19. सूत्रक्रमभेदः।
20. वार्त्तिकविषयः कारिकामाश्रित्य समर्थनम्।
21. वार्त्तिकांशस्य सूत्रभागत्वमादाय प्रतिपादनकौशलम्।